उक्तिप्रत्युक्तिस्तोत्रम्

अङ्गुल्या कः कवाटं प्रहरति कुटिले माधवः किं वसन्तो
नो चक्री किं कुलालो नहि धरणिधरः किं द्विजिह्वः फणीन्द्रः ।
नाहं घोराहिमर्दी खगपतिरसि किं नो हरिः किं कपीन्द्र-
स्त्वित्येवं गोपकन्याप्रतिवचनजडः पातु मां पद्मनाभः ॥ १॥

कृष्ण त्वं क्व गतोऽसि चाद्य मृगयासक्तो वनान्तं गतो
गन्धोऽन्यो वनपुष्पजः श्रमजलं धर्मक्षतं कण्टकैः ।
अस्त्वेवं मृगया तु केनचिदहो दष्टोऽधरो दृश्यते
शङ्खापूरणमत्र कारणमिदं कुर्या प्रमाणानि ते ॥ २॥

अम्भस्ते शयनीयमेतदुदधेर्लीलोपधानं फणी
त्वत्तेजः परमाणुरेष दहनो भृत्यास्समस्तास्सुराः ।
कुक्षिन्यस्तसमस्तभारजगतः किं स्यात्तुलारोपणे
व्यर्थं वाच्यमिदं स्त्रियोपहसितः स्मेरो हरिः पातु नः ॥ ३॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

उक्तिप्रत्युक्तिस्तोत्रं सम्पूर्णम्

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु